# ॥ श्री शन्यष्टोत्तरशतनाम स्तोत्रम् ॥

नारद उवाच ।

सौरिः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः ।
शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः ॥ १ ॥

शिखिकण्ठनिभो नीलश्छायाहृदयनन्दनः ।
कालदृष्टिः कोटराक्षः स्थूलरोमावलीमुखः ॥ २ ॥

दीर्घो निर्मांसगात्रस्तु शुष्को घोरो भयानकः ।
नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुर्जटाधरः ॥ ३ ॥

मन्दो मन्दगतिः खंजो तृप्तः संवर्तको यमः ।
ग्रहराजः कराली च सूर्यपुत्रो रविः शशी ॥ ४ ॥

कुजो बुधो गुरुः काव्यो भानुजः सिंहिकासुतः ।
केतुर्देवपतिर्बाहुः कृतान्तो नैर्ऋतस्तथा ॥ ५ ॥

शशी मरुत् कुबेरश्च ईशानः सुर आत्मभूः ।
विष्णुर्हरो गणपतिः कुमारः काम ईश्वरः ॥ ६ ॥

कर्ता हर्ता पालयिता राज्येशो राज्यदायकः ।
छायासुतः श्यामलाङ्गो धनहर्ता धनप्रदः ॥ ७ ॥

क्रूरकर्मविधाता च सर्वकर्मावरोधकः ।
तुष्टो रुष्टः कामरूपः कामदो रविनन्दनः ॥ ८ ॥

ग्रहपीडाहरः शान्तो नक्षत्रेशो ग्रहेश्वरः ।
स्थिरासनः स्थिरगतिर्महाकायो महाबलः ॥ ९ ॥

महाप्रभो महाकालः कालात्मा कालकालकः ।
आदित्यभयदाता च मृत्युरादित्यनन्दनः ॥ १० ॥

शतभिरुक्षदयिता त्रयोदशीतिथिप्रियः ।
तिथ्यात्मकस्तिथिगणो नक्षत्रगणनायकः ॥ ११ ॥

योगराशिर्मुहूर्तात्मा कर्ता दिनपतिः प्रभुः ।
शमीपुष्पप्रियः श्यामस्त्रैलोक्याभयदायकः ॥ १२ ॥

नीलवासाः क्रियासिन्धुर्नीलाञ्जनचयच्छविः ।
सर्वरोगहरो देवः सिद्धो देवगणस्तुतः ॥ १३ ॥

॥ इति श्रीभविष्यपुराणे
श्री शन्यष्टोत्तरशतनाम स्तोत्रं संपूर्णम् ॥